# Short Gitas from Bharatamanjari of Kshemendra

# લઘુતમગીતાસઙ્ગ્રહઃ ભારતમઞ્જર્યાં ક્ષેમેન્દ્રવિરચિતાઃ

## Document Information

Text title : laghutamagItAsangraha from Bharatamanjari of Kshemendra

File name : laghutamagItAsangrahaBM.itx

Category : giitaa, kShemendra

Location : doc_giitaa

Author : Kshemendra

Description/comments : kAvyamAlA 65. Bharatamanjari

Latest update : October 15, 2022

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

April 29, 2023

*sanskritdocuments.org*

# લઘુતમગીતાસઙ્ગ્રહાઃ ભારતમઞ્જર્યાં ક્ષેમેન્દ્રવિરચિતાઃ

## વામદેવગીતા

ઉવાચ કોસલાધીશં વામદેવઃ પુરા મુનિઃ ।
ધર્મલોપેન ભૂપાનાં ક્ષીયન્તે સહસા શ્રિયઃ ॥ ૧૩.૩૬૨॥

સુહૃદ્ભિઃ પ્રણયક્રીતૈર્માનક્રીતૈર્મનીષિભિઃ ।
ધનક્રીતૈસ્તથા ભૃત્યૈર્ધાર્યતે શ્રીર્મહીભુજા ॥ ૧૩.૩૬૩॥

શૃણોતિ કરુણાક્રન્દં શ્રુત્વા ચ ત્રાયતે ભયત્ ।
નાવિચાર્ય સૃજેદ્દણ્ડં યઃ સ સર્વપ્રિયો નૃપઃ ॥ ૧૩.૩૬૪॥

નાતઃ પરતરં કિઞ્ચિદ્રાજ્ઞઃ કિલ્બિષકારણમ્ ।
પ્રજા વિરક્તતાં યાન્તિ યત્કુભર્તુરિવાબલાઃ ॥ ૧૩.૩૬૫॥

ઇત્યુક્તં વામદેવેન શ્રુત્વા સ વસુધાધિપઃ ।
વર્તમાનઃ સ્વધર્મેણ પ્રજાનામભવત્પ્રિયઃ ॥ ૧૩.૩૬૬॥

## ષડ્ગીતા

શ્રુત્વેતિ મન્દિરં પાર્થો ગત્વા ભીષ્મગિરઃ સ્મરન્ ।
વિદુરેણ કથાશ્ચક્રે ધર્મસર્વસ્વવાદિના ॥ ૧૩.૬૭૮॥

તેષાં વિદુરષષ્ઠાનાં બભૂવુર્વિવિધાઃ કથાઃ ।
શુદ્ધપ્રવૃત્તધર્માણાં ધર્મકામાર્થસંશ્રયાઃ ॥ ૧૩.૬૭૯॥

## શમ્પાકગીતા

ધનિનાં નિર્ધનાનાં ચ વિભાગં સુખદુઃખયોઃ ।
પૃષ્ટોઽથ ધર્મરાજેન પુનઃ શાન્તનવોઽબ્રવીત્ ॥ ૧૩.૭૨૦॥

શમ્પાકો નામવાન્વિપ્રઃ પુરા ધીમાનભાષત ।
વિતૃષ્ણયાતિપીઙ્યન્તે સન્તોષોઽમૃતનિર્ઝરઃ ॥ ૧૩.૭૨૧॥

ભયાનભિજ્ઞો નિશ્ચિન્તો નિદ્રાવાન્રોગવર્જિતઃ ।
નિર્ધનઃ સુખિતો નિત્યં યથાવાપ્તકૃતક્રિયઃ ॥ ૧૩.૭૨૨॥

સુખમાસ્તે સુખં શેતે સુખં ચ પ્રતિબુધ્યતે ।
સન્તોષવાન્નિરાયાસો નિરપાયો નિરામયઃ ॥ ૧૩.૭૨૩॥

ધનિનો દર્પપૂર્ણસ્ય ભ્રૂભઙ્ગાદ્વક્રદર્શિનઃ ।
કુમ્ભીન્યસ્તધનત્રાણચિન્તાપાણ્ડુકૃશત્વિષઃ ॥ ૧૩.૭૨૪॥

ચૌરો ભૂપાલભીતસ્ય વૃદ્ધ્યાર્થં પાપકારિણઃ ।
અજીર્ણરોગગ્રસ્તસ્ય ક્ષીવિનો ભોજ્યકાઙ્ક્ષિણઃ ॥ ૧૩.૭૨૫॥

લોભશુષ્કકલત્રસ્ય દુઃખૈકફલભાગિનઃ ।
સ્પર્ધાકથૈવ કા નિત્યમાકિઞ્ચન્યામૃતાશિભિઃ ॥ ૧૩.૭૨૬॥

મન્યતે તાવદાત્માનં શક્રવૈશ્રવણોપમમ્ ।
ગૃહ્યતે ધનવાન્યાવન્ન દસ્યુનૃપમન્યુભિઃ ॥ ૧૩.૭૨૭॥

ધનં ગમયતાં ભૂરિ ગૃહાંશ્ચ સુપરિચ્છદાન્ ।
નિર્ધનાદ્ધનિનામેવ કૃચ્છ્રાદ્દુઃખવિષૂચિકા ॥ ૧૩.૭૨૮॥

## વિચખ્નુગીતા

ગીતં વિચખ્નુના પૂર્વં ધર્મેઽસ્મિન્નેવ ભૂભુજા ।
અહિંસા પરમો ધર્મઃ ક્રતુશ્ચાદ્રવ્યડમ્બરઃ ॥ ૧૩.૯૬૨॥

પશુપ્રાણૈર્યજન્ત્યેતે કામાત્માનઃ ફલેપ્સવઃ ।
માંસમત્સ્યમધુપ્રાયં ધૂર્તૈર્ભોગાય કલ્પિતમ્ ॥ ૧૩.૯૬૩॥

લોલુપૈર્દમ્ભગુરુભિઃ પશુયાગોઽધિગમ્યતે ।
પૂજ્યો હિ ભગવાન્વિષ્ણુઃ સોઽદ્ભિઃ પુષ્પૈશ્ચ તુષ્યતિ ॥ ૧૩.૯૬૪॥

ગ્લાનિં શરીરં નાયાતિ યથા ન મરણં ભવેત્ ।
તથા કર્મ પ્રવર્તેન શરીરં ધર્મસાધનમ્ ॥ ૧૩.૯૬૫॥

## હારીતગીતા

યતેન્દ્રિયેચ્છઃ સન્ન્યાસી નિર્ભયો જનિતાભયઃ ।
અવજ્ઞાતોઽવધૂતશ્ચ શૂન્યાચારોઽપ્યનાશ્રયઃ ॥ ૧૩.૧૦૦૧॥

અનિર્વિણ્ણઃ પ્રહૃષ્ટશ્ચ જ્ઞાતા મૌની ચ મુચ્યતે ।
બુધ ઇત્યાહ હારીતો વિશુદ્ધજ્ઞાનસંશ્રયઃ ॥ ૧૩.૧૦૦૨॥

## વૃત્રગીતા

ભ્રષ્ટૈશ્વર્યઃ પુરા વૃત્રઃ શુક્રં ગુરુમભાષત ।
જીવાનાં કર્મબન્ધાનાં તિષ્ઠતાં પાઞ્ચભૌતિકે ।
પર્યાયેણ ભવન્ત્યેવ સમ્પદો વિપદસ્તથા ॥ ૧૩.૧૦૦૩॥

નિઃસ્પૃહોઽસ્મિ ન શોચામિ ભજે સામ્યમનશ્વરમ્ ।
ન યાસ્યામ્યધુના રાગમવર્ણો વર્ણસઙ્ગમાત્ ॥ ૧૩.૧૦૦૪॥

ઇત્યુક્ત્વા દાનવપતિર્યદૃચ્છોપગતાન્મુનેઃ ।
સનત્કુમારાદજ્ઞાસીદ્વિષ્ણું કારણમવ્યયમ્ ॥ ૧૩.૧૦૦૫॥

સ વિજ્ઞાયાચ્યુતં દેવં પ્રયયૌ પરમાં ગતિમ્ ।
સોઽયં નારાયણઃ કૃષ્ણઃ સમ્બન્ધી તવ પાણ્ડવ ॥ ૧૩.૧૦૦૬॥

## પરાશરગીતા

શ્રેયઃ કિમિતિ પૃષ્ટોઽથ પુનરાહ પિતામહઃ ।
પુરા વિદેહાધિપતિં યદુવાચ પરાશરઃ ॥ ૧૩.૧૦૫૫॥

મનોરથો રથો યસ્ય સંયતઃ શાન્તિરશ્મિભિઃ ।
ન ચરત્યવટે તસ્ય કર્મણોઽપિ સુખં સદા ॥ ૧૩.૧૦૫૬॥

રત્યૈ ભોગા વિમૂઢાનાં સા દુઃખાય વિયોગિનામ્ ।
તમસે દુઃખમેવૈષાં બન્ધાય મહતે તમઃ ॥ ૧૩.૧૦૫૭॥

સતાં ભોગવિયોગેષુ નિર્વેદો નામ જાયતે ।
નિર્વેદસ્તપસે તેષાં તપઃ સંસારશાન્તયે ॥ ૧૩.૧૦૫૮॥

સદાચારપ્રવૃત્તાનાં યથાશાસ્ત્રાનુસારિણામ્ ।

સ્વકર્મસક્તમનસાં સ્વયમાયાન્તિ સમ્પદઃ ॥ ૧૩.૧૦૫૯॥

## હંસગીતા

પ્રજાપતિર્હંસરૂપી રાજ્ઞા પૃષ્ટોઽબ્રવીત્પુરા ।
ક્રોધો મૃત્યુઃ કુજન્તૂનાં સ્વસુખાદ્યદિ નિર્ગતઃ ॥ ૧૩.૧૦૬૦॥

દગ્ધાઃ ક્રોધેન શોચન્તિ ક્રોધાનધા નિપતનતિ ચ ।
જિતક્રોધઃ શસુખં શેતે ગ્રસ્તરાગાદિબન્ધનઃ ॥ ૧૩.૧૦૬૧॥

ઇતિ ભારતમઞ્જર્યાં ક્ષેમેન્દ્રવિરચિતા લઘુતમગીતાસઙ્ગ્રહાઃ સમાપ્તાઃ ।

vAmadevagItA ShaDgItA shampAkagItA vichakhnugItA hArItagItA
vRRitragItA parAsharagItA haMsagItA

---

*Short Gitas from Bharatamanjari of Kshemendra*
pdf was typeset on April 29, 2023

Please send corrections to *sanskrit@cheerful.com*